H.S.S.G. 170.

* श्रीः *

* हरिदास-संस्कृत-ग्रन्थमाला *

UNIVERSITY OF CHICAGO
LIBRARY
Classics
SERIAL RECORD

PK402
.H3
V.170

१७०

॥ श्रीः ॥

संक्षिप्तदीक्षापद्धतिः

तुलादानपद्धतिसहिता ।

The Haridas Sanskrit series
Benares City

प्रकाशकः—
जयकृष्णदास हरिदास गुप्तः—
चौखम्बा संस्कृत सीरिज़ आफिस,
बनारस सिटी ।

सं. २००२] मूल्य ~~॥~~ |3| [ई. १९४५

[अस्य ग्रन्थस्य सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः]

अथ

संक्षिप्तदीक्षापद्धतिः

पण्डितश्रीगङ्गाधरमिश्रेण सङ्कलिता ।

अथ मन्त्रोद्धारविधिः ।

तत्र दीक्षाग्रहणावश्यकत्वमुक्तं यामले—

अदीक्षितानां मर्त्यानां दोषं शृण्वन्तु साधकाः! । अन्नं विष्ठासमं ज्ञेयं जलं मूत्रसमं तथा ॥
अदीक्षितकृतं श्राद्धं श्राद्धं चादीक्षितस्य च । गृहीत्वा पितरस्तस्य नरके चाशु दारुणे ॥
पतन्त्येव न सन्देहो यावदिन्द्राश्चतुर्दश । तथाऽप्यदीक्षितस्यार्चान् देवा गृह्णन्ति नैव हि॥

तत्र दीक्षाशब्दव्युत्पत्तिस्तत्रैव—

दिव्यं ज्ञानं यतो दद्यात् कुर्यात्पापस्य संक्षयम् ।
तस्माद् दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः ॥

अपि च चिदम्बररहस्ये—

दीयते ज्ञानमेतेन क्षीयतेऽज्ञानसम्पदः । तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्र वेदिभिः।

केभ्यो मन्त्रग्रहणं न कार्यन्तदुक्तं ताराकल्पे—

पितुर्मन्त्रं न गृह्णीयात्तथा मातामहस्य च । सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च ॥
प्रमादाद्वा तथाऽज्ञानात् पितृदीक्षां समाचरेत् ।
प्रायश्चितं ततः कुर्यात् पुनर्दीक्षां समाचरेत् ॥
पितुर्दीक्षा यतेर्दीक्षा दीक्षा च वनवासिनः ।
अनाश्रमाणां या दीक्षा सा दीक्षा दुःखदायिनी ॥

त्रिपुरारहस्ये—

भिक्षुभ्यश्च वनस्थेभ्यो वर्णिभ्यश्च महेश्वरि ! ।
गृहस्थो भोगमोक्षार्थी मन्त्रदीक्षां न चाचरेत् ॥

ब्राह्मणः सर्ववर्णानां, त्रयाणां क्षत्रियो गुरुः । वैश्यो वर्णद्वयानां तु शूद्राणां शूद्र एव तु

स्त्रीणां पतिमन्त्रग्रहणेऽपि दोष उक्तो भविष्यपुराणे—

"पत्युर्मन्त्रं पितुर्मन्त्रं न गृह्णीयाद् द्वै कदाचन ।"

इति । पतिभिन्नगुरुजनसद्भावे बोध्यम् ।

पतिभिन्नगुरुजनाभावे पत्युर्मन्त्रग्रहणे प्रमाणमुक्तं चिदम्बररहस्ये—

पतिव्रतानां सर्वासां पतिरेव गुरुः स्मृतः । तस्मादेव तु सा दीक्षां गृह्णीयाद्भक्तिसंयुता ॥
भर्तुर्गुरोः सकाशाद्वा गृह्णीयाद्भक्तिसंयुता । पितुर्वा स्वगुरोर्वापि चान्यथा पापभागिनी ॥

अथ शिष्यलक्षणम्—

शान्तः सुनीतिः शुद्धात्मा श्रद्धावान् धारणक्षमः । समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो व्रती॥
एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा ॥

गुरौ शिष्येण मानवभावो न कर्त्तव्यस्तदाह—

गुरौ मनुष्यबुद्धिं च मन्त्रे चाक्षरबुद्धिताम् । यन्त्रे मूर्त्यां शिलाबुद्धिं कुर्वाणो नरकं व्रजेत्॥

अथ दीक्षाग्रहणे मुहूर्त्तविचारः—

तत्र चैत्रवैशाखश्रावणाश्विनकार्त्तिकमार्गमाघफाल्गुनमासाः, रविचन्द्रबुधगुरुशुक्रदिनानि, द्वितीयातृतीयापञ्चमीसप्तमीदशम्येकादशीद्वादशीतिथयः, अ० रो० मृ० पुन० पुष्य० पू० फ० उ० फ० ह० चि० स्वा० वि० अनु० मूल० पूर्वाषाढ़, उत्तराषाढ, शतभि० पू.भा; उ०भा० रे० एतानि भानि, शुभ, सिद्धि, आयु०ध्रुव० प्रीति० सौ० वृ० हर्षण० एते योगाः । बव० बा० कौ० तै० एतानि करणानि, वृषसिंहकन्याधनुर्मीनलग्नानि प्रशस्तानि । शुक्लः पक्षः । पञ्चम्यन्तं कृष्णपक्षोऽपि । एते शुभा दीक्षाग्रहणे ।

चिदम्बररहस्ये—प्रातःकाले धर्मदा स्यात्संगवो राज्यदः स्मृतः ।
मध्याह्ने सर्वसिद्धिः स्यात् परो द्वौ च विनिन्दितौ ॥
रजनी मन्त्रदाने च केवलेनैव गर्हिता ।
दिवा सर्वेऽपि कुर्वन्ति सिद्धिदं परमं स्मृतम् ॥

तत्रैव लग्नशुद्धिरुक्ता—

त्रिषडायगताः पापाः शुभाः केन्द्रत्रिकोणगाः ।
दीक्षायां तु शुभाः सर्वे रन्ध्रस्थाः सर्वनाशकाः ॥

तत्र वर्षेषु सिद्धदिनानि—मेषतुलामकरकर्कसंक्रान्तिः । मन्वादिः, युगादिः, सूर्यग्रहणम् । इत्यादि ।

अथ देवताभेदेन मन्त्राः—

दक्षिणकालिकायाः—क्रीँ १॥ क्रीँ क्रीँ क्रीँ ॥ ऐँ क्रीँ ऐँ । अन्ये मन्त्रा अन्यग्रन्थे द्रष्टव्याः ।

तारायाः—स्त्रीँ ॥ ओँ ह्रीँ स्त्रीँ हूं फट् । श्रीँ स्त्रीँ हूँ फट् । ह्रीँ स्त्रीँ हूँ ।

The UNIVERSITY OF CHICAGO LIBRARY

एकजटायाः—ह्रीँ श्रीँ हूँ फट् ।
नीलसरस्वत्याः—ह्रीँ स्त्रीँ हूँ ।
बालायाः—ऐँ क्लीँ सौँ ।
महालक्ष्म्याः—श्रीँ । ऐँ श्रीँ ह्रीँ क्लीँ । श्रीँ ह्रीँ श्रीँ ।
भुवनेश्वर्याः—ह्रीँ १ । ऐँ ह्रीँ श्रीँ । आँ ह्रीँ क्रोँ ।
छिन्नमस्तायाः—हूँ ।
धूमावत्याः—धूँ धूँ धूमावती ठः ठः ।
दुर्गायाः—ह्रीँ दूँ । स्त्रीँ दूँ । श्रीँ दूँ । ऐँ दूँ । ओँ दूँ । क्लीँ दूँ । इत्यादि
अन्नपूर्णायाः—श्रीँ नमः । ओँ नमः । क्लीँ नमः । ह्रीँ नमः । ओँ स्वाहा । क्लीँ स्वाहा । ह्रीँ स्वाहा । ऐँ स्वाहा ।
बगलायाः—ह्रीँ । ओँ ह्रीँ बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय ह्रीँ ओँ स्वाहा ।

अथ गुरुमाहात्म्यमुक्तं चिदम्बररहस्ये—

गुरुभक्तिविहीनाय तपो विद्या व्रतं कुलम् । निष्फलं हि महेशानि ! केवलं लोकरञ्जनम् ॥
नारायणे महादेवे मातापित्रोश्च राजनि । यथा भक्तिर्भवेद् देवी ! तथा कार्या निजे गुरौ ।
लक्ष्मीनारायणौ वाणिधातारौ गिरजाशिवौ । श्रीगुरुं गुरुपत्नीं च पितराविति चिन्तयेत् ।
गुरौ मनुष्यबुद्धिं च मन्त्रे चाक्षरबुद्धिताम् । यन्त्रे मूर्त्यां शिलाबुद्धिं कुर्वाणो नरकं व्रजेत् ।
गुरुः पिता गुरुर्माता गुरुर्देवो गुरुर्गतिः । शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।
गुरौ हितं हि कर्त्तव्यं वाङ्मनःकायकर्मभिः । अहिताचरणाद् देवि ! विष्ठायां जायते कृमिः
गुरुत्यागाद्भवेन्मृत्युर्मन्त्रत्यागाद्दरिद्रता । गुरुमन्त्रपरित्यागाद्रौरवं नरकं व्रजेत् ॥
गुर्वर्थं धारयेद् देहं तदर्थं धनमर्जयेत् । निजप्राणान् परित्यज्य गुरुकार्यं समाचरेत्
गुरुक्तं परुषं वाक्यमाशिषं चिन्तयेच्छिवे ! तेन सन्ताड़ितो वाऽपि प्रसादमिति संस्मरेत्
गुर्वग्रे न तपःकुर्यान्नोपवासं व्रतादिकम् । तीर्थयात्रां च नो कुर्तान्न स्नायादात्मशुद्धये ।
न नियोगं गुरोर्दद्याद्युष्मदा नैव भाषयेत् । ऋणदानं तथा दानं वस्तूनां क्रयविक्रयम्
न कुर्याद्गुरुभिः सार्धं, तदाज्ञां नैव लङ्घयेत् । न कुर्यान्नास्तिकैर्वादमाभाषणमपीश्वरि !
विलोक्य दूरतो गच्छेन्नासीत सह तैः क्वचित् । गुरौ सन्निहिते यस्तुपूजयेदन्यमन्तिके
स याति नरकं घोरं सा पूजा निष्फला भवेत् । यस्तिलार्धं तदर्थं वा गुरुस्वमुपजीवति
लोभान्मोहात् स पच्येत नरके च त्रिसप्तके । गुरुद्रव्याभिलाषी च गुरुस्त्रीगमनोत्सुकः
पतितस्य च क्षुल्लस्य प्रायश्चित्तं न विद्यते । व्यजनं पादुका छत्रं चामरं केशमोचनम्

ताम्बूलमुल्बणं वेषमुत्सृजन् प्रविशेच्छनैः । पादप्रक्षालनं स्नानमभ्यङ्गं दन्तधावनम् ॥
मूत्रं निष्ठीवनं क्षौरं शयनं स्त्रीनिषेवणम् । वीरासनं च दुर्वाक्यमासनं हास्यरोदनम् ॥
केशमोचनमुष्णीषं प्रपदोद्घाटनं तथा । द्यूतकुक्कुटमल्लादि युद्धमित्यादि चाम्बिके ॥
गुरुयोगिमहायोगिसिद्धपीठाश्रमेषु च । नाचरेदाचरेन्मोहाद् देवताशापमाप्नुयात् ॥
अभिमानो न कर्त्तव्यो जातिविद्याधनादिभिः । छायाभूमिपरित्यागी तिष्ठेच्छ्रीगुरुसन्निधौ ॥
एकासने नोपविशेद् गुरुणा तत्समैः सह ॥
रिक्तहस्तस्तु नोपेयाद्राजानं देवतां गुरुम् । गुरुं नाम्ना न भाषेत जपाच्छ्राद्धादृते प्रिये !
गुरुं प्रकाशयेद्धीमान् मन्त्रं नैव प्रकाशयेत् । अप्रकाशप्रकाशाभ्यां क्षीयते सम्पदायुषी: ॥
एकाक्षरप्रदातारं यो गुरुं नैव मन्यते । श्वानयोनिशतं गत्वा चाण्डालत्वमवाप्नुयात् ॥
पूजामध्ये गुरौ ज्येष्ठे पूज्ये चापि समागते ।
नत्वा ब्रूयात्ततः शेषमाचरेत्तदनुज्ञया ॥ इत्यादि ।

स्वामिना यस्मान्मन्त्रग्रहणं कृतं, तत एव स्त्रिया अपि मन्त्रो ग्राह्य इत्युक्तं त्रिपुरारहस्ये—

यस्मात् पत्युश्च वामाङ्गं पत्नीति श्रुतयो जगुः । तस्मात्पतिश्च पत्नी च गुरुमेकं समाश्रयेत्
अज्ञानाद्वा गुरुं याऽन्यं कुरुते दैवतं तथा । सा नारी च्यवते धर्मान्नरकं चाधिगच्छति ॥

यदि दैवदसंशोधितमनिष्टं बीजं गृहीतं तदा पुनरिष्टमन्त्रग्रहणे गुरुकरणविचारस्तत्रैव—

यो गुरोस्तु मनुं प्राप्य पुनर्मन्त्रान्तरेच्छया । अन्यं न वरयेद्धीमान् वरयेद्यदि पापभाक् ॥
मन्त्रान्तरे यदीच्छा चेत्तमेव शरणं व्रजेत् । मृतश्चेद्दैवयोगेन तदा गुर्वन्तरं व्रजेत् ॥

अथ स्वप्नलब्धमन्त्रग्रहणविधिरुक्तस्तत्रैव—

स्वप्नलब्धे तु कलशे गुरोः प्राणान् निवेशयेत् । वटपत्रे कुङ्कुमेन लिखित्वा ग्रहणं शुभम्
ततः सिद्धिमवाप्नोति चान्यथा विफलं भवेत् । इदं गुरोरभावे तु विधानं ग्रहणं मतम्

अथ मन्त्रोद्धारविधिर्लिख्यते —

यथा कस्यचित् 'देवदत्त' इति नामास्ति, तस्य को मन्त्र इष्टः स्यादिति विचारे नामादिवर्णः = द, कालीभुवनेश्वरीतारामहालक्ष्मीसरस्वतीमन्त्राणां क्रमेण मन्त्रादिवर्णाः = क, ह, स, श, ए । एभिः सहदकारस्य विचारः । तत्रादौ **कुलाकुलचक्रं** विलोकनीयम् । तत्र दकारः पृथ्वीतत्त्वे वर्त्तते । तस्य ककारः=वायुतत्त्वं न हितम् । हकारः आकाशतत्त्वं समम् । सकारः=जलतत्त्वात्मकं मित्रम् । शकारः=आकाशतत्त्वं समम् ॥ एकारोऽग्नितत्त्वं शत्रुः ।

Cont. Lung

अतः

द.	क	ह	स	श	ए
	अ.	स.	मि	स	श.

अस्माच्चक्रात् सर्वापेक्षया तारामन्त्रः शुभः सिद्धः । अथ **राशिचक्रे** दकारो मकरराशौ ततः ककारगतकोष्ठसंख्या=१०, ह कोष्ठसंख्या = ६, स संख्या=६, श = ६, ए=७ । अत्र सर्वे मन्त्राः शुभा एव । अत्र ४ । ८ । १२ एते त्याज्याः । शेषाणि शुभानि । यात्रायां चन्द्रविचारवत् , रिपुर्वेदाष्टभानुषु' इत्युक्तिरपि तत्र प्रमाणम् ।

अथ ताराचक्रे दकारोऽनुराधानक्षत्रम् । ततः क. ह. श. स. वर्णगतकोष्ठानि गणयित्वा नवभिर्भक्त्वा तारामानचक्रम् अत्र सर्वोत्तमौ शका ैकारौ

द	क.	ह.	श.	स.	ए
०	१	१	१	१	८

कह सा मध्यमाः । यात्रायां ताराविचारवत् ३।५। ७ एता अशुभाः१=मध्यमा । २।४।६।८।९ उत्तमा ज्ञेयाः । अत्रैव गणचक्रमपि विचारणीयम् । यथा द=देवः, क=देवः । ह: = नरः, श = नरः । स=नरः । अत्र दकारस्य ककारः सर्वोत्तमः । ह स शा उत्तमाः । इति ।

अथ **अकड़मचक्र**विचारे—द कोष्ठाद्गणिताः क. श. ह. साः क्रमेण क=८ । श=१ । ह = ४ । स=३ । ए=३ । अत्र 'त्यजेच्छत्रुं मृतिं व्ययम् ।'इत्युक्त्या ककारो न शुभः । शेषाः शुभाः । अत्र गणनाविलोमती बोध्या । यथा मेषान्मीनं, मीनात्कुम्भः । कुम्भान्मकरमेवं ज्ञेयम् ।

अथ अकथहचक्रे विचारः—

अत्र चत्वारि, चतुष्कानि, तत्रापि चत्वारि चत्वारि कोष्ठानि सन्ति । यथा प्रथमम् १, २, ३, ४ एभिश्चतुर्भिरङ्कितं प्रथमकोष्ठम् । ५।६।७।८ एभिरङ्कितं द्वितीयकोष्ठम् । ९।१०।११। १२ एभिरङ्कितं तृतीयम् । १३।१४।१५।१६ एभिरङ्कितं चतुर्थं कोष्ठम् । तत्र प्रत्येककोष्ठे चत्वारि कोष्ठानि स्पष्टतया दृश्यन्ते । अत्र यावत् यस्मिन् चतुष्के नामादिवर्णः पतितस्तस्मान्मन्त्रादिवर्णकोष्ठं यावद्गणनीयम् , अर्थान्नामादिवर्णचतुष्ककोष्ठं = सिद्धम् , ततो दक्षिणक्रमेण द्वितीयं चतुष्कं साध्यम् । ततस्तृतीयं=सुसिद्धम् , चतुर्थम्=अरिः ।

यथाऽत्र दकारः ५ कोष्ठे, तत्र ५, ६, ७, ८ एतान्यङ्कितकोष्ठानि मिलित्वा यदेकं चतुष्कं, तत्सिद्धम् । ९।१०।११।१२ एतच्चतुष्कं साध्यम् । १३।१४।१५।१६ एतच्चतुष्कं सुसिद्धम् । १।२।३।४ एतच्चतुष्कमरिः । अथ तत्रापि प्रत्येकचतुष्के चत्वारि कोष्ठानि, तत्रापि सिद्धसाध्यसुसिद्धारिक्रमेण गणनीयम् । अर्थादत्र तावद् दकारस्य ककारः कीदृशः ? इति विचारे दकारचतुष्काच्चतुर्थे चतुष्के ककारस्तेनारिः । एवञ्च नामादिवर्णचतुष्कोपरि मन्त्रादिवर्णगतचतुष्कं तथा निवेशनीयम् , यथा तत्सजातीयता न नश्यति अत्र ५।६।७।८ चतुष्कोपरि १।२।३।४ चतुष्कं निवेशितं तदा ५ अस्योपरि १ इदं कोष्ठं, ६ अस्योपरि २ इदं, ७ अस्योपरि ३, ८ अस्योपरि ४ इदं पतितं, तत्र दकोष्ठे एव ककोष्ठं पतितं, तत्रापि सिद्धसाध्यसुसिद्धारिक्रमेण गणने सिद्धमेव सिद्धं पूर्वमरिः । अतोऽरिसिद्धो हि ककारः । हकारोऽपि तथैव सुसिद्धारिः सकारः । सिद्धारिः शकारः । अत्र सर्वत्र अरियुक्तत्वात्सर्वेऽपि मन्त्रा न शुभाः । 'आदावन्ते रिपुर्यस्य भवेत् त्याज्यः स मन्त्रकः' । एकारः सुसिद्धसुसिद्धम् ।

अथ ऋणधनचक्रविचारः—

तत्र चक्रोर्ध्वकोष्ठगता नामगतस्वरव्यञ्जनसंख्याः पृथग् विलिख्य योगं कृत्वाऽष्टभिर्भजेत् , तन्नामशेषमनष्टं स्थाप्यम् । एवञ्च चक्राधःकोष्ठगतमन्त्रस्वरव्यञ्जनसंख्या पृथग् विलिख्य योगं कृत्वाऽष्टभिर्भजेत् , शेषं मन्त्रशेषम् , अनयोर्यदि मन्त्रशेषोऽधिकाङ्कस्तदा मन्त्रः शुभः । समे समः । अल्पे मन्त्रशेषे स च मन्त्रो न ग्राह्यः ।

तथोक्तं तन्त्रे—मन्त्रो यद्यधिकाङ्कः स्यात्तदा मन्त्रं जपेत् सुधीः ।
समेऽपि च जपेन्मन्त्रं न जपेत्तु ऋणाधिके ॥

यथा देवदत्त = द् + ए + व् + अ + द् + अ + त् + त् + अ = १ + २ + १ + २ + १ + २ + ० + ० + २ + = ११ $\frac{१}{८}$ = १ + $\frac{३}{८}$

अत्राष्टभक्तनामाङ्कशेषः = ३, अथ 'ए' = + अं = ४ + ० = ४

अत्र मन्त्राङ्कः = ४, योऽधिकः स ऋणी भवेदित्यनेन ऋणी शुभप्रदो मन्त्रः, 'मन्त्रो यद्यधिकाङ्कः स्यात्तदा मन्त्रं जपेत् सुधी' रित्यनेन च देवदत्तस्य 'ऐं' इति मन्त्रः शुभः ।

एवम् श्रीँ = श् + र् + ई + अं = ० + ३ + ६ + ० = ९ $\frac{१}{८}$ = १ + $\frac{१}{८}$

क्रीँ = क् + र् + ई + अं = ६ + ३ + ६ + ० = १५ $\frac{१}{८}$ = १ + $\frac{७}{८}$

अत्र देवदत्तस्य शकारो न शुभः । दक्षिणकालिकामन्त्रस्याष्टभक्तशेषाङ्काः = ७, एतदधिका न कापि मन्त्रेऽतोऽयं मन्त्रः सर्वेषामिष्ट एवेति ।

अथवा मन्त्राक्षराङ्कयोगो द्विगुणो नामाक्षराङ्कयोगेन युक्तोऽष्टभक्तः सन्मन्त्रशेषाङ्कः । तथा नामाक्षराङ्कयोगो द्विगुणो मन्त्राक्षराङ्कयोगेन युक्तोऽष्टभक्तः सन्नामशेषाङ्कः । तत्रापि मन्त्रशेषाङ्केऽधिके शुभप्रदो मन्त्रोऽन्यथाऽशुभप्रद इति ।

एवं षट्चक्रेषु मन्त्रस्योद्धारं कृत्वा शुभाशुभत्वं विचार्यम् ।

यदि प्रकृत्या देवविशेषेऽनुरागबाहुल्यं तदा तन्मन्त्रोद्धारावश्यकत्वं नैवेत्युक्तं चिदम्बररहस्ये—

यत्र यस्य भवेद्भक्तिविशेषः स मनूत्तमः । वैरिकोष्ठमपि प्राप्तोऽभीष्टदस्तस्य जायते ॥

अथ सङ्क्षेपेण मन्त्रग्रहणप्रकारः ।

आदौ स्वस्तिवाचनं, ततः शिष्यः संकल्पं कुर्यात् तत्र संकल्पः—

ओं अद्येत्यादि—जन्मजन्मान्तरार्जितपापक्षयपूर्वकसकलाभीष्टाभ्युदयकामोऽमुकदेवतामन्त्रग्रहणमहं करिष्ये, ततो विधिवत्कलशस्थापनं विधाय गुरुवरणं कुर्यात् 'ओं अद्येत्यादि अमुकगोत्रममुकशर्माणं वाऽमुकगोत्राममुकदेवीं (मातरं) एभिः पुष्पचन्दनाक्षततताम्बूलवासोयुगालङ्कारैर्गुरुत्वेनाहं वृणे—वृतोऽस्मीति प्रतिवचनम् । यथाविहितं कर्म कुरु । करवाणीति प्रतिवचनम् । ततो गुरुः शिष्यशिरसि मातृकान्यासं मूलमन्त्रं च जपन् जलेनाभिषिञ्चेत् । ततो दातव्यमन्त्रमष्टोत्तरशतं प्रजप्य शिष्यकर्णे दद्यात् स्त्रिया वामकर्णे, पुरुषस्य दक्षिणकर्णे । शिष्यः फलद्रव्यादिभिर्गुरुपदयोः पतन् गुरुमन्त्रदेवतैक्यं सम्भावयन् प्रणमेत् । ततः शिष्यं गुरुरुत्थाप्याशीर्दद्यात् । ततः शिष्योऽष्टोत्तरशतमष्टोत्तरसहस्रं वा तन्मन्त्रजपं विधाय गुरुदक्षिणां कुर्यात् । ओं अद्य कृतैतदमुकमन्त्रग्रहणप्रतिष्ठार्थमिदं द्रव्यं यथानामगोत्राय वा यथानामगोत्रायै मात्रे, वा गुरवे दक्षिणां तुभ्यमहं सम्प्रददे ।

ततोऽष्टोत्तरसहस्रं, वाऽष्टोत्तरशतं तन्मन्त्रयुक्ततद्देवतानाम्ना स्वाहान्तेन यथा 'क्रीं कालिकायै स्वाहा' इति मन्त्रेण हवनं कुर्यात् ।

(१) अथ कालीध्यानम् ।

शवारूढां महाभीमां घोरदंष्ट्रां हसन्मुखीम् । चतुर्भुजां खड्गमुण्डवराभयकरां शिवाम्॥
मुण्डमालाधरां देवीं ललज्जिह्वां दिगम्बराम् ।
एवं संचिन्तयेत् कालीं श्मशानालयवासिनीम् ॥

(२) अथ ताराध्यानम् ।

प्रत्यालीढपदार्पिताङ्घ्रिशवहृद्घोराट्टहासापरा खड्गेन्दीवरकर्त्रिखर्परभुजा हुङ्कारबीजोद्भवा ।
खर्वानीलविशालपिङ्गलजटाजूटैकनागैर्युता जाड्यन्यस्य कपालकर्तृजगतां हन्त्युग्रतारा स्वयम् ॥

(३) अथ षोडशीध्यानम् ।

बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् । पाशाङ्कुशशरांश्चापं धारयन्तीं शिवां भजे ॥

(४) अथ भुवनेश्वरीध्यानम् ।

उद्यदिनद्युतिमिन्दुकिरीटां तुङ्गकुचां नयनत्रययुक्ताम् ।
स्मेरमुखीं वरदाङ्कुशपाशां भीतिकरां प्रभजे भुवनेशीम् ॥

(५) अथ छिन्नमस्ताध्यानम् ।

प्रत्यालीढपदां सदैव दधतीं छिन्नं शिरः कर्तृकां
दिग्वस्त्रां स्वकबन्धशोणितसुधाधारां पिबन्तीं मुदा ।
नागाबद्धशिरोमणिं त्रिनयनां हृद्युत्पलालङ्कृतां
रत्यासक्तमनोभवोपरि दृढां ध्यायेज्जवासन्निभाम् ॥
दक्षे चातिसिताविमुक्तचिकुरा कर्त्री तथा खर्परं
हस्ताभ्यां दधती रजोगुणभवा नाम्नाऽपि सावर्णिनी ।
देव्याश्छिन्नकबन्धतः पतदसृग्धारां पिबन्ती मुदा
नागाबद्धशिरोमणिमनुविदा ध्येया सदा सा सुरैः ॥
प्रत्यालीढपदा कबन्धविगलद्रक्तम्पिबन्ती मुदा
सैषा या प्रलये समस्तभुवनं भोक्तुं क्षमा तामसी ।
शक्तिः साऽपि परात्परा भगवती नाम्ना परा डाकिनी
ध्येया ध्यानपरैः सदा सविनयं भक्तेष्टभूतिप्रदा ॥

(६) अथ त्रिपुरभैरवीध्यानम् ।

उद्यद्भानुसहस्रकान्तिमरुणक्षौमां शिरोमालिकां
रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वराम् ।
हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविन्दश्रियं
देवीं बद्धहिमांशुरत्नमुकुटां वन्दे समन्दस्मिताम् ॥

(७) धूमावतीध्यानम् ।

विवर्णा चञ्चला दुष्टा दीर्घा च मलिनाम्बरा । विमुक्तकुन्तला रूक्षा विधवा विरलद्विजा॥
काकध्वजास्थारूढा विलम्बितपयोधरा । शूर्पहस्ताऽतिरूक्षाक्षा धूतहस्ता वरान्विता ॥
प्रवृद्धघोणा तु भृशं कुटिला कुटिलेक्षणा । क्षुत्पिपासार्दिता नित्यं भयदा कलहास्पदा ॥

(८) अथ बगलामुखीध्यानम् ।

मध्येसुधाब्धि मणिमण्डपरत्नवेदीसिंहासनोपरिगतां परिपीतवर्णाम् ।
पीताम्बराभरणमाल्यविभूषिताङ्गीं देवीं स्मरामि धृतमुद्गरवैरिजिह्वाम् ॥
जिह्वाग्रमादाय करेण देवीं वामेन शत्रून् परिपीडयन्तीम् ।

गदाभिघातेन च दक्षिणेन पीताम्बराढ्यां द्विभुजां नमामि ॥

(९) अथ मातङ्गीध्यानम् ।

श्यामाङ्गीं शशिशेखरान्त्रिनयनां रत्नसिंहासनस्थिताम् ।
वेदबाहुदण्डैरसिखेटकपाशाङ्कुशधराम् ॥

(१०) अथ कमलात्मिकाध्यानम् ।

कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजै—
र्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम् ।
बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलां
क्षौमाबद्धनितम्बबिम्बबलितां वन्देऽरविन्दस्थिताम् ॥


(११) अथ दुर्गाध्यानम् ।

सिंहस्कन्धसमारूढां नानाऽलङ्कारभूषिताम् । चतुर्भुजां महादेवीं नागयज्ञोपवीतिनीम् ॥
रक्तवस्त्रपरीधानां बालार्कसदृशीतनुम् । नारदाद्यैर्मुनिगणैः सेवितां भवगेहिनीम् ॥
त्रिवलीवलयोपेतनाभिनालसुवेशिनीम् । रत्नद्वीपे महाद्वीपे सिंहासनसमन्विते ॥
प्रफुल्लकमलारूढां ध्यायेत्तां भवगेहिनीम् ॥

(१२) अथ शिवध्यानम् ।

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

अथ राशिचक्रम् ।




कुलाकुलचक्रम् ।

वायुः	अग्नि	पृथ्वी	जलम्	आकाशः
अ.	इ	उ	ऋ	ऌ.
आ	ई	ऊ	ॠ	ॡ
ए	ऐ	ओ	औ	अं
क.	ख	ग.	घ	ङ
च.	छ.	ज	झ	ञ
ट	ठ	ड	ढ	ण
त	थ	द	ध	न
प	फ	ब.	भ	म
य	र	ल.	व	श.
ष	क्ष.	व	स	ह.

अथ अकथहचक्रम् ।

अ क थ ह	ड ड. प	आ. ख. द.	ऊ. च. फ
१	२	५	६
४	३	८	७
ओ. ड़. व.	ऌ. झ. म.	औ. ढ़. श.	ॡ. ञ. य
ई. घ. न.	ॠ. ज. भ.	इ. ग. ध.	ॠ. छ. ब.
१३	१४	९	१०
१६	१५	१२	११
अः त. स.	ऐ. ठ. ल.	अं. ण. ष.	ए. ट र.

अकडमचक्रम् ।



ऋणधनचक्रम् ।

ऋ.	ऌ.	उ.	ऋ	ऌ	ए.	ऐ.	ओ	औ.
आ.	ॐ.	ऊ.	ॠ	ॡ.				
क.	ख.	ग.	घ.	ङ.	च.	छ.	ज.	झ.
ट.	ठ.	ड.	ढ.	ण.	त.	थ.	द.	ध.
प.	फ.	ब.	भ.	म.	य.	र.	ल.	व.
श.	ष.	स.	ह.					

६.	६	०	४	४	०	०	४	१
६	०	४	४	०	०	४	१	०
०	४	४	०	०	४	१	०	५
४	४	०	०	४	१	०	५	२
४	०	०	४	१	०	५	२	१
०	०	४	१	०	५	२	१	०
०	४	१	०	५	२	१	०	३
४	१	०	५	२	१	०	३	४
१	०	५	२	१	०	३	४	६

मन्त्राङ्काः

नामाङ्काः

अथ नक्षत्रचक्रम् ।

अ. आ	इ.	ई. उ. ऊ.	ऋ ॠ ऌ ॡ	ए	ऐ.	ओ. औ.	क.	ख. ग.
अश्विनी	भरणी	कृ.	रो.	मृ.	आ.	पुनः	पुष्य	अश्लेषा
देवः	नरः	राक्षसः	नरः	देवः	नरः	देवः	देवः	राक्षसः
घ ङ	च.	छ. ज.	झ. ञ.	ट. ठ.	ड	ढ ण	त थ द.	ध.
मघा.	पूर्वा.	उत्तरा	हस्तः	चित्रा	स्वाती	विशाखा	अनु०	ज्येष्ठा
राक्षसः	नरः	नरः	देवः	राक्षसः	देवः	राक्षसः	देवता	राक्षसः
न. प. फ.	ब.	भ.	म.	य. र.	ल.	व. श.	ष स ह.	अं अः क्ष.
मूल.	पूर्वा.	उत्तराषाढा	श्रवण.	धनिष्ठा	शतभिषा	पू. भा.	उ. भा.	रेवती.
रा.	न.	न.	दे.	रा.	रा.	न.	न.	दे.

इति संक्षिप्तदीक्षापद्धतिः समाप्ता ।

अथ तुलादानविधिः ।

पण्डितश्रीकृष्णमोहनठक्कुरेण सङ्कलिता ।

महादानान्तर्गततुलादानस्य प्राथम्यात्तद्विधिर्लिख्यते—

तत्र कृतनित्यक्रियो यजमानो दर्भेष्वासीनो दर्भान् धार्यमाणा शुचिराचम्य सङ्कल्पं कुर्यात् । तद्यथा—ओं अद्यामुकमासीयामुकपक्षीयामुकतिथावमुकशर्मणः मम अमुकरोगनिरासार्थे क्षिप्रारोग्यसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थम् अमुकद्रव्यतुला-पुरुषदानमहं करिष्ये, ओं अद्येत्यादि देशकालौ सङ्कीर्त्य एकैकमन्वन्तरकाला-वच्छिन्नप्रतिलोकपालस्थाननिवासपूर्वकार्कवर्णकिंकिणीजालमालिविमानाधिकरणका-प्सरःपूजासहितशिवपुरगमनपूर्वककल्पकोटिशतावच्छिन्न-विष्णुपुराधिकरणकनिवास-कामः सुवर्णरत्नरौप्यादितुलापुरुषदानमहं करिष्ये इति संकल्प्य ततो विष्णु-गणेशशिवदुर्गासूर्यधर्मराजमन्त्रजापकानां वरणम्, आचार्यवरणं च कुर्यात्। ततो लक्ष्मीं स्वर्णमयीं प्रतिमां सम्पूज्य गणेशादिदेवानां पूजनं कुर्य्यात् । ततः **सुलक्षणां तुलां** विधाय धर्मराजस्य सूर्यस्य गोविन्दस्य च प्रतिमां हिरण्यमयीं कृत्वा गणेशं पञ्चदेवताश्च सम्पूज्य कुशत्रयतिलजलान्यादाय ओं अद्येत्यादि-अमुक-फलकामोऽमुकद्रव्यीयतच्छरीरसम्मिताम्रादितुलापुरुषदानमहं करिष्ये । तत ओं गणेशाय नम इति गणेशम्, ओंधर्मराजाय नम इति धर्मराजम्, ओं सूर्याय नम इति सूर्यम्, ओं नारायणाय नम इति गोविन्दम्, प्रतिमोपरि पञ्चोपचारैः सम्पूज्य तुलां पुष्पादिभिरलङ्कृत्य गोविन्दप्रतिमां तुलामध्यभागेऽवलम्ब्य तुला-पट्टबन्धेषु दक्षिणप्रान्तपट्टबन्धादारभ्य तत्तन्मन्त्रैः ओं ईशानाय नमः १, ओं शशिने नमः २, ओं मारुताय नमः ३, ओं रुद्राय नमः ४, ओं सूर्याय नमः ५, ओं विश्व-कर्मणे नमः ६, ओं गुरवे नमः ७, ओं अङ्गिरोऽग्निभ्यां नमः ८, ओं प्रजापतये नमः ९, ओं विश्वेभ्यो नमः १०, ओं जगद्विधात्रे नमः ११, ओं पर्यन्यशम्भूभ्या-न्नमः १२, ओं पितृदेवताभ्यो नमः १३, ओं सौम्याय नमः १४, ओं धर्माय नमः १५, ओं अमरराजाय नमः १६, ओं अश्विभ्यां नमः १७, ओं जलेशाय नमः १८, ओं मित्रावरुणाभ्यां नमः १९, ओं मरुद्गणेभ्यो नमः २०, ओं धनेशाय नमः २१, ओं गन्धर्वाय नमः २२, ओं वरुणाय नमः २३, ओं विष्णवे नमः २४, इति चतु-र्विंशतिदेवताः नमोऽन्तेन सम्पूज्य मध्ये गोविन्दं सम्पूज्य गृहीत कुसुमाञ्जलिः तुलां

त्रिःप्रदक्षिणीकृत्य प्राङ्मुख उपविष्टस्तुलामभिमन्त्रयेत् ।

"ओं नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता ।
साक्षीभूता जगद्धात्री निर्मिता विश्वयोनिना ॥
एकतः सर्वसत्यानि तथानृतशतानि च ।
धर्माधर्मकृतां मध्ये स्थापितासि जगद्धिते ! ॥
त्वं तुले सर्वभूतानां प्रमाणमिह कीर्त्तिता ।
मां तोलयन्ती संसारादुद्धरस्व नमोऽस्तुते" इत्यनेन ॥
ओंयोऽसौ तत्त्वाधिपो देवः पुरुषः पञ्चविंशकः ।
स एषोऽधिष्ठितो देवस्त्वयितस्मान्नमो नमः ।

इति नत्वा गोविन्दमभिमन्त्र्य प्रार्थयेत्—

ओंनमो नमस्ते गोविन्द ! तुलापुरुषसंज्ञक ॥
त्वं हरे ! तारयस्वास्मान्नस्मात् संसार सागरात् ॥ इति ।

इति कुसुमाञ्जलिं तुलोपरि क्षिप्त्वा प्रदक्षिणीकृत्य सर्वाभरणसम्पन्नो वाममुष्टौ धर्मराजस्य दक्षिणमुष्टौ सूर्यस्य प्रतिमां कृत्वा प्राङ्मुखे शिक्ये उपविश्य, दक्षिण-शिक्ये देयद्रव्यं दद्यात्, यावत् स्वस्मादवनतं भवेत् । पुष्टिकोमलया भूमिं स्पृष्ट्वा गोविन्दप्रतिमां वीक्ष्यमाणः—

ॐ नमस्ते सर्वभूतानां साक्षिभूते ! सनातनि ! । पितामहेन देवि ! त्वं निर्मिऽता विश्वकर्मणा ॥ त्वया धृतं जगत्सर्वं सह स्थावरजङ्गमम् । सर्वभूतात्मभूतास्थ नमस्ते वि-श्वधारिणि!॥ इति पठित्वा तोलनीयद्रव्ये किञ्चित् सुवर्णं दत्वा-यथा पवित्रमतुलमपत्यं जातवेदसः । तथा स्वेन पवित्त्रेण सुवर्णं हि पुनातु माम् ॥ ओं यथाग्निर्देवता सर्वाः सुवर्णं हि तदात्मकम् । तथा स्वेन पवित्त्रेण सुवर्णं हि पुनातु माम्॥ पवित्रत्वाद्यथा देवैः शिरसा धार्यते सदा । तथा स्वेन पवित्त्रेण सुवर्णं हि पुनातु माम्" यत्कृतं स्वेन का-येन मनसा वचसाऽथवा । दुष्कृतं तु सुवर्णस्थं यातु मुक्तिं परां शुभाम् ॥ इत्युक्त्वा कालमात्रं स्थित्वाऽवतीर्य गोविन्दं प्रदक्षिणीकृत्य तुलापश्चिमदिशि उपविश्य ताम्रे सूर्यं घृते मृत्युञ्जयं लौहे यमं सम्पूज्य, ओं एतच्छरीरसम्मितामुकद्रव्यीयतुलापुरुषाय नमः, एवं त्रिः । ओं ब्राह्मणाय नमः, एवं त्रिः सम्पूज्य सिक्त्वा कुशत्रयतिलजला-न्यादाय ओं अद्येत्यादि पुत्रप्रतिबन्धकशेषानिष्टभ्रूटितिप्रशमनपूर्वकचिरञ्जीव्यौरसवंश-करसत्पुत्रप्राप्तिकामः, पुत्रसत्वे पौत्रादिपदं योज्यम्, इममेतच्छरीरसम्मितामुकद्रव्यीय-तुलापुरुषं विष्णुदैवतं यथा नामगोत्राय ब्राह्मणायाऽहं ददे । ततो दक्षिणा । ओं अद्य

कृतैतत् अमुकद्रव्यीयतुलापुरुषदानप्रतिष्ठार्थमेतावद्द्रव्यमुल्यकहिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणामहं ददे इति । अथ च तोलितद्रव्ये तुलसीपत्रं निधाय देशकालौ सङ्कीर्त्य अमुकाम इदममुकद्रव्यमात्मसमतोलितमाचार्याद्यन्येभ्यो ब्राह्मणेभ्यः समस्ताश्रितबन्धुवर्गेभ्यो दीनानाथेभ्यश्च दातुमहमुत्सृज्ये । ततः ओं अद्येत्यादि कृतैतत् अमुकतुलादानकर्मणः साङ्गतासिद्ध्यर्थम् आचार्याय इदं सुवर्णमग्निदैवतं दक्षिणात्वेन तुभ्यमहं सम्प्रददे । ततो भूयसी दक्षिणा—ओं अद्य कृतैतत् अमुकतुलापुरुषदानसाङ्गतासिद्ध्यर्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो यथाशक्तिभूयसीं दक्षिणां दातुमहमुत्सृज्ये । **ब्राह्मणभोजन** संकल्प्यः—ओं अद्य कृतैतत् अमुकतुलापुरुषदानकर्मणः साङ्गतासिद्ध्यर्थं यथाशक्ति ब्राह्मणान् यथाकालं यथोत्पन्नेनान्नेन भोजयिष्ये ।

ओं यान्तु देवगणाः सर्वे पूजामादाय मामकीम्।इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥

इति विसृर्ज्जनं कुर्यात् । ततः गुरवे पूर्वमर्द्धांशम्, अर्द्धांशंऋत्विगादिभ्यो दद्यात् । इदं द्रव्यं नातिचिरं गृहे स्थापनीयम् । इति संक्षेपविधिः,

विष्णुधर्मोत्तरे तु पुण्यं दिनमथासाद्य तृतीयायां विशेषतः । गोमयेनानुलिप्तायां भूमौ कुर्यात् घटं शुभम् ॥ दारवं शुभवृक्षस्य चतुर्हस्तप्रमाणतः । सुवर्णं तत्र बध्नीयात् स्वशक्त्या घटितं घटे ॥ सौवर्णं स्थापयेत्तत्र वासुदेवं चतुर्भुजम् । शिक्यद्वयं तु बध्नीयात् स्थापयेत् पिष्टके ततः । तत्रारुहेत्सवस्त्रास्त्रः पुष्पालङ्कारभूषितः ॥ अभीष्टां देवतां गृह्य स्नापयित्वा घृतादिभिः ॥ तुलादानस्य सर्वस्य विधिरेष प्रकीर्त्तितः ॥ इति ।

गारुड़े तु कामनाभेदेनानेकविधं तुलाकरणं विहितम् । तत्तु तत एवावलोकनीयम् ।

तुलादानस्य फलानि—

आत्मनस्तु तुलां कृत्वा सुवर्णं यः प्रयच्छति । स तारयेत् पितृगणान् दशपूर्वान् दशापरान् ॥ आत्मनस्तु तथा तद्वत् फलभाग् जायते नरः । जन्मप्रभृति यत्पापं मातृकं पैतृकं तथा ॥ सुवर्णदानाद्दारिद्र्यं न पश्यति कदाचन । रजतस्य तुलां कृत्वा सुकृती यः प्रयच्छति ॥ तावद्वर्षप्रमाणेन निर्मलः स्वर्गभाग्भवेत् । अनन्तरं भवेद्राजा पृथिव्यां नात्र संशयः । सुवर्णहारी कुष्ठी वा सर्वव्याधियुतोऽपि वा ॥ ताम्रस्य तु तुलां कृत्वा मुच्यते नात्र संशयः । स तु वर्षसहस्रं वै स्वर्गलोके महीयते ॥

इति सङ्क्षिप्ततुलादानविधिः समाप्तः ।

मुद्रकः—**विद्याविलास प्रेस, बनारस ।** १.....